ज्ञानविविधा
कला, मानविकी और सामाजिक विज्ञान की सहकर्मी-समीक्षित, मूल्यांकित, त्रैमासिक शोध पत्रिका

ISSN : 3048-4537(Online)
3049-2327(Print)
IIFS Impact Factor-6.125
Vol.-3; Issue-2 (Apr.-June) 2026
Page No.- 317-323
DOI :-10.71037/gyanvividha.v3i2.47
©2026 Gyanvividha
https://journal.gyanvividha.com

**Author's :**

**1. चोखराजः**
शोधछात्रः, संस्कृतविभाग,
हरियाणा-केन्द्रीयविश्वविद्यालयः

**2. डॉ. देवेन्द्रसिंहराजपूतः**
सहायकाचार्यः,संस्कृतविभागः
हरियाणा-केन्द्रीयविश्वविद्यालयः

Corresponding Author :

**चोखराजः**
शोधछात्रः, संस्कृतविभाग,
हरियाणा-केन्द्रीयविश्वविद्यालयः

# महाभारते प्रतिपादितः सततविकासस्य अवधारणा (सामाजिक-आर्थिक-पर्यावरणीयसन्दर्भे समीक्षात्मकम् अध्ययनम्)

**सारांशः** प्रस्तुतशोधपत्रे **महाभारते प्रतिपादितः सततविकासस्य अवधारणा(सामाजिक-आर्थिक-पर्यावरणीयसन्दर्भे समीक्षात्मकम् अध्ययनम्)** इति विषयस्य समीक्षात्मकमध्ययनं कृतम् अस्ति। आधुनिकविश्वे सततविकासः (Sustainable Development) मानव-समाजस्य प्रमुखलक्ष्यत्वेन स्वीकृतः अस्ति, यस्य मूलाधाराः सामाजिक-समता, आर्थिकन्यायः तथा पर्यावरणसंरक्षणम् इति त्रयः स्तम्भाः सन्ति। महाभारतम् केवलं ऐतिहासिक-महाकाव्यं न, अपितु मानवजीवनस्य नैतिक-सामाजिक-राजनीतिक-आर्थिक-पर्यावरणीयमूल्यानां विशाल भाण्डारमपि अस्ति। महाभारते धर्मस्य महत्त्वं पुनः पुनः प्रतिपादितम् अस्ति - **धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः।
यत्स्याद्धारणसंयुक्तं स धर्म इति निश्चयः॥**[1]
अस्य श्लोकस्य भावः अस्ति यत् धर्मः स एव यः समाजं धारयति तथा लोकव्यवस्थां स्थिरां करोति। एषः सिद्धान्तः सामाजिकसततविकासस्य मूलाधारः अस्ति।सामाजिकसन्दर्भे महाभारतम् सर्वभूतहितं, समता, सहअस्तित्वं च प्रतिपादयति- **अहिंसा परमो धर्मः धर्महिंसा तथैव च॥** *(महाभारतम्, अनुशासनपर्व)* अयं सिद्धान्तः सामाजिकशान्तेः, मानवाधि-कारसंरक्षणस्य तथा समावेशीविकासस्य आधाररूपेण ग्राह्यः।

**मुख्यशब्दाः** महाभारतम्, सततविकासः, धर्मः, सामाजिकन्यायः, आर्थिकविकासः, पर्यावरणसंरक्षणम्, अहिंसा, लोकसंग्रहः, सर्वभूत-हितम्।

**प्राक्कथनम् -** वैदिककालात् भारतीयजीवनपरम्परायां सततं समावे-शात्मकं च विकासस्य तत्त्वं समाहितं दृश्यते। वैदिकऋषयः स्वजीवनं तथा विविधानि आयामान् विद्ध्य विभज्य पर्यावरणस्य अहानिं विना, भाविन्याः पीढेः कृते संसाधनानां सुलभतां सुनिश्चितुं, प्रकृत्या प्रदत्तानां संसाधनानां विनयपूर्वकं समावेशात्मकं च उपभोगं कर्तुं प्रवृत्ताः। उपनिषत्सु अपि अस्य भावस्य द्योतना दृश्यते। विशेषतः ईशावास्योपनिषदस्य प्रथमे मन्त्रे उक्तं -

**ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।**
**तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥**[2]

अत्र प्रतिपाद्यते यत् - अस्य जगतः सर्ववस्तूनि ईश्वरमयं भवन्ति, अतः त्यागभावेनैव तेषां उपभोगः करणीयः। लोभस्य न कश्चन अवकाशः, यतः सर्वं तद् ईश्वरस्यैव। अत्र प्रकृत्या दत्तानां संसाधनानां मितोपभोगस्य शिक्षां प्रदत्तां, यथा मनुष्यः केवलं स्वावश्यकतानुसारमेव संसाधनानां उपभोगं कुर्यात्, न तु तेषां अधिकसंग्रहं।

लौकिकसंस्कृतसाहित्ये महत्त्वस्य दृष्ट्या रामायणात् अनन्तरं महाभारतस्यैव प्रमुखं स्थानं विद्यते। विश्वसाहित्ये सर्वातिविस्तीर्णतमः ग्रन्थः महाभारतमेव, यस्मिन् लक्षाधिकाः श्लोकाः सन्ति। एषः ग्रन्थः भारतीयसंस्कृतेः विषयेषु एकः विराट् कोशः च, आचारस्य च संहिता अस्ति। महाभारतं भारतीयसभ्यायाः दर्पणरुपेण स्थितम्, यः धर्मं, अध्यात्मं, इतिहासं, भूगोलं, आख्यानं, नीतिशास्त्रं, आचारविचारं, पर्यावरणं च सामाजिकरचनां च सम्यक् प्रकारेण समाविश्य दर्शयति। एषः केवलं युद्धकथा न, अपि तु भारतीयसंस्कृतेः, दर्शनस्य, नीतिशास्त्रस्य च अद्वितीयं ग्रन्थरुपं। अस्य ग्रन्थस्य व्यापकत्वे धर्म-अर्थ-काम-मोक्षाणां समुचितः समन्वयः, पर्यावरणस्य, समाजस्य, शासनस्य च संतुलितदृष्टिः निहिता अस्ति। अस्यैव महत्त्वात्, एषः ग्रन्थः "महाभारतम्" इति कथ्यते - **"महत्त्वाद् भारवत्त्वाच्च महाभारतमुच्यते।"**[3] एषः ग्रन्थः न केवलं ग्रन्थरुपेण, अपि तु जीवंतसंस्कृतिरुपेण, जीवनदर्शनरुपेण, मानवीयं मूल्यरुपेण च अमरः अस्ति। सः मानवसमाजं शिक्षयति यत् -धर्मपालनमेव जीवनस्य सार्थकता, विजयस्य च मूलं। लोभः, क्रोधः, अहंकारः च सर्वे विनाशहेतवः भवन्ति। यथोक्तं - **"धर्मो रक्षति रक्षितः"** यानि महाभारते दृश्यन्ते, तानि सर्वाणि भारतवर्षे दृश्यन्ते; यानि तत्र न दृश्यन्ते, तानि क्वापि न दृश्यन्ते - **"यन्न भारते तन्न भारते"** इति प्रसिद्धम्। एवं च महाभारते भारतवर्षस्य समस्तपक्षाः प्रत्यक्षतः परोक्षतः च समाहिताः। यथोक्तं-

**"धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्॥"**[4]

आर्थिकसन्दर्भे धर्माधारितस्य अर्थोपार्जनस्य महत्त्वं प्रतिपादितम् -

**ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे।**
**धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते॥**[5]

अर्थात् धर्मेण एव अर्थस्य तथा कामस्य प्राप्तिः भवति; अतः धर्माधारित-आर्थिकव्यवस्था एव स्थायिविकासस्य आधारः भवितुमर्हति। पर्यावरणीयसन्दर्भे महाभारतं सर्वभूतानां संरक्षणं तथा प्रकृतिसम्मानं प्रतिपादयति-

**न हिंस्यात्सर्वभूतानि मित्रभावेन वर्तयेत्।**[6]

तथा च –

**आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥**[7]

एते सिद्धान्ताः पर्यावरणीयन्यायस्य, जैवविविधतासंरक्षणस्य तथा संसाधनानां संयमितोपयोगस्य प्रेरणास्रोतः सन्ति।

**शोधविषय-क्षेत्रम् उद्देश्यञ्च -** प्रस्तुतशोधस्य प्रमुखक्षेत्रम् महाभारते निहितं सततविकासस्य विश्लेषणमेव अस्ति। अस्य शोधपत्रस्य अन्येऽपि निम्नलिखिताः उद्देश्याः सन्ति –

1. महाभारते प्रतिपादितस्य सततजीवनस्य सामाजिक-आर्थिक-पर्यावरणदृष्ट्या विश्लेषणम्।
2. महाभारते वर्णितानि सामाजिक-आर्थिक-मूल्यानि आधुनिकसन्दर्भे विश्लेषणम् ।
3. भारतीयज्ञानपरम्परायालोके सततविकासस्यवधारणां विश्लेषणम्।
4. महाभारतशिक्षामाध्यमेन वैश्विकविकासलक्ष्याणां (SDGs) पूर्तौ सांस्कृतिकदृष्ट्या समीक्षणम्।

**शोधप्रविधिः -** प्रस्तुते शोधकर्मणि मुख्यतया विवेचनात्मकः, विश्लेषणात्मकः, तुलनात्मकः च समीक्षात्मकः पद्धतिः प्रयुज्यते। यस्य उद्देश्यं महाभारते निहितस्य सन्धारणीयविकासस्य सामाजिकानाम्, आर्थिकानाम् च पर्यावरणीयानाम्

तत्वानाम् विश्लेषणं कर्तुम् अस्ति। शोधस्य आधारः महाभारतस्य मूलपाठः भविष्यति, यत् गभीरतया अध्ययनं कृत्वा संदर्भानुसारं प्रसङ्गानाम्, श्लोकानाम् च विचाराणां च व्याख्या क्रियते। महाभारते वर्णिताः सामाजिकः, आर्थिकः, पर्यावरणीयः च विषयाः यथासम्भवं वर्णनात्मकया प्रविधिना निरूप्यन्ते। अतः एतस्मिन् प्रस्तुते शोधप्रबंधे विवेचनात्मकः, समीक्षात्मकः, विश्लेषणात्मकः च तुलनात्मकः शोधप्रविधयः उपयुज्यन्ते**।**

**सततविकासस्य अवधारणा -** सततविकासः विकसित एवं विकासशीलदेशानां च विशेषज्ञैः, पर्यावरणचिन्तकैः, राष्ट्रनायकैः च सह निरन्तरं तर्कवितर्काणां चर्चायाः प्रमुखं विषयत्वेन स्वीकृतः अस्ति। वयं वर्तमानकालस्य आवश्यकताः पूरयितुं पृथिव्याः संसाधनानां अत्यधिकं दोहनं कुर्मः, येन ते संसाधनाः भविष्ये समाप्तिं गमिष्यन्ति इति आशङ्का वर्तते। अतः तान् भविष्याय संरक्षितुं अस्माकं दायित्वं भवति। सततविकासः, जूनमासे 1992 तमे वर्षे ब्राजीलदेशे आयोजितेसंयुक्तराष्ट्रसंघस्य पर्यावरणविकासविषये सम्मेलनस्य एकः मुख्यः केन्द्रविषयः आसीत्।

**सततविकासस्य अर्थः परिभाषा च -** सततविकासस्य सामान्यार्थः अस्ति - **"**सः विकासः यः पर्यावरणं, समाजं, अर्थव्यवस्थां च सम्यक् संतुल्यावस्थायाम् स्थापयित्वा अग्रे सरति। "सततविकास" इत्यस्य पदस्य व्यापकप्रयोगः 1987 तमे वर्षे प्रकाशितायाः "ब्रुण्टलैण्ड् प्रतिवेदनायाः (Brundtland Report) अनन्तरं प्रारब्धः। तस्मिन्नेव प्रतिवेदने अस्य स्पष्टा परिभाषा प्रदत्ता यत्र उक्तं - **"सततविकासः स एव विकासः भवति, यस्मिन् भाविनां पीढीनां आवश्यकतानाम् पूर्त्यर्थं तेषां सामर्थ्ये अवरोधं विना वर्तमानकालस्य आवश्यकतानां पूर्तिः क्रियते।** सततविकासस्य वर्तमानस्य च भाविनः च मानवसमाजस्य कल्याणाय अपेक्षितानां साधनानां पूर्तिं करोति।

**सततविकासस्य चरणाः -** सततविकासस्य सप्तदश लक्ष्यरूपाः चरणाः संयुक्तराष्ट्रसंघेन (UnitedNations) **"सततविकासलक्ष्यानि"** (Sustainable Development Goals – SDGs) इति नाम्ना 2015 तमे वर्षे निश्चितानि, यान् 2030 तमे वर्षे प्राप्तुं लक्ष्यीकृतम्। सन्धारणीयविकासस्य एते सप्तदश वैश्विकलक्ष्यानि निम्नप्रकारेण सन्ति - **दारिद्र्यनिवारणम्** (गरीबी उन्मूलनम्), **क्षुधानिवारणम्** (भूखमरी समाप्तिः), **स्वास्थ्यं कल्याणं च, गुणयुक्तशिक्षा, लैङ्गिकसमता, शुद्धजलम् स्वच्छता च, सुलभा स्वच्छा च ऊर्जा, उद्यमिता, नवप्रवर्तनं, आधारभूतसंरचना च, उद्योगविकासः च आर्थिकवृद्धिः, असमानतानां न्यूनीकरणम्, सन्धारणीयनगराणि समुदायाः च, उत्तरदायी उपभोगः उत्पादनं च, जवस्थायाः परिवर्तने निरोधनम्** (जलवायुपरिवर्तननिवारणम्), **जलचरजीवनस्य संरक्षणम्, स्थलजीवनस्य पारिस्थितिकतन्त्रस्य संरक्षणम्, शान्तिः न्यायः सशक्तसंस्थाः च, लक्ष्यप्राप्त्यै वैश्विकसहकार्येण साझेदारी।**

**महाभारते प्रतिपादितः** सतत**विकासः -** सततविकासः अत्यन्तं महत्त्वपूर्णः यतः सः मानवस्य आवश्यकतानां पूर्तिं करोति, प्राकृतिकसंसाधनानां च मानवेन सह समन्वयं सहजतया स्थापयति, च भाविन्याः पीढेः कृते तेषां संसाधनानां संरक्षणं करोति। अस्य विकासस्य क्षेत्रं विस्तीर्णतमं दृश्यते। अधुनातने युगे, यदा सततविकासस्य अवधारणा वैश्विकविमर्शस्य केन्द्रविन्दुर्भवति, तदा महाभारतस्य सन्देशाः परमं प्रासङ्गिकाः जाताः। महाभारतः केवलं धार्मिकं आध्यात्मिकं च ग्रन्थं नास्ति, अपि तु सः सामाजिक-आर्थिक-पर्यावरणीयशिक्षानां महद्भाण्डाररूपेण स्थितः अस्ति। यद्यपि सततविकासस्य कल्पना आधुनिकपदेभ्यः विंशतिशताब्द्यां परिभाषिता अभवत्, तथापि तस्य मूलतत्त्वानि च विचाराः च महाभारते प्रत्यक्षरूपेण दृश्यन्ते। महाभारतस्य नानाप्रसङ्गेषु, नीतिवचनेषु, संवादेषु च दृष्ट्वा, सामाजिकव्यवस्था, धर्मः, न्यायः, शिक्षायाः महत्त्वम्, संसाधनानां सम्यक् वितरणम्, स्त्रीपुरुषयोः समता, लोककल्याणचिन्ता च इत्येते तत्वानि स्पष्टतया दृश्यन्ते। युधिष्ठिरस्य शासनस्य आदर्शः आसीत् **"सर्वे भवन्तु सुखिनः"** इति, यत्र सर्वेभ्यः समानावसरः दत्तः। पाण्डवैः वनवासे अज्ञातवासे च काले जनजातीनां वनवासीसमुदायानां च सह संवादः सहयोगः च कृतः, येन सामाजिकसमरसता सुस्थापिता अभवत्। महाभारते उल्लिख्यते यत् आदर्शः राजा ग्रामं, वनं, कृषिम्, व्यापारं च सम्यक् प्रकारेण विकासयेत्, येन ग्रामीणं शहरीयं च समाजं समुन्नतिं यान्ति। अत्र अपि

उक्तम् - ग्रामस्य उन्नतिः, संसाधनस्य संरक्षणम्, वनेषु च रक्षणम् अनिवार्यं भवति। द्रौपदी, सुभद्रा, कुन्ती, गांधारी च - एताः महिलाः केवलं पारिवारिकभूमिकायाम् एव न, अपि तु नीतिनिर्माणे सामाजिकदृष्टिकोनस्य निर्माणे च अपि अत्यन्तं महत्वपूर्णं स्थानं अर्हन्ति। भीष्मपितामहेन अपि स्पष्टं उक्तं **-"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः"**[8] इति। यत्र स्त्रीणां सम्मानः भवति, तत्र देवताः निवसन्ति इति। अयं विचारः सामाजिकसंतुलनस्य सन्धारणीयविकासस्य च मूलाधारः अस्ति। श्रीकृष्णस्य भगवद्गीतायां उपदेशः अपि महाभारतस्य एव अंशः**,** यत्र (अध्यायः 3, श्लोकः 20-21) उक्तम् - **"लोकसंग्रहमेवापि सम्पश्यन्कर्तुमर्हसि"** - अर्थात् - भवान् लोककल्याणस्य दृष्ट्या एव कर्मणि प्रवर्तेत। एषः सामाजिकस्य उत्तरदायित्वस्य स्पष्टः संकेतः अस्ति। महाभारते वर्णव्यवस्था अपि कठोरजन्माधारितं न मान्यते, अपि तु गुणकर्मविभागशः इत्येव प्रतिपाद्यते -**"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।"**[9]

महाभारते सततविकासस्य स्वरूपं धर्म, न्यायः, पर्यावरणरक्षणम्, समानता, शिक्षा, लोकसंग्रहस्य च सिद्धान्तेभ्यः आधारितं दृश्यते। अत्र स्पष्टतया प्रतिपाद्यते यत् - सततविकासः केवलं आर्थिकविकासस्य विषयः नास्ति, अपि तु सः सामाजिकनैतिकविकासस्य अपि विषयः अस्ति। तस्य परमं लक्ष्यं - **"सर्वे भवन्तु सुखिनः"** इति भवति। महाभारते अर्थः (धनम्, संसाधनानि, आर्थिकव्यवस्था च) धर्म-कामयोः सह सम्यक् संतुलितः स्थाप्यते, येन दीर्घकालीनं न्याययुक्तं च विकासः सम्भवति। अद्यतनस्य "Sustainable Development" इत्यस्य मुख्यविचारः अस्ति - "वर्तमानस्य आवश्यकताः तथा पूरयन्तु, यथा भाविनां पीढीनां आवश्यकतासु कश्चन विघ्नः न भवेत्।" एषः एव भावः महाभारते धर्मप्रधानायाः अर्थनीतेः रूपेण उपलभ्यते, यत्र आर्थिकसमृद्धिः केवलं भौतिकसुखाय न, अपि तु सामाजिककल्याणाय, न्यायाय, पर्यावरणरक्षणाय, संसाधनानां च संतुलितवितरणाय प्रयुक्ता दृश्यते। महाभारतस्य शान्तिपर्वे अनुशासनपर्वे च अर्थः चतुर्णां पुरुषार्थानां (धर्म, अर्थ, काम, मोक्ष) मध्ये एकः महत्त्वपूर्णः स्तम्भरूपेण वर्णितः अस्ति। भीष्मपितामहः कथयति **- "अर्थं मूलं धर्मकामौ"**[10] अर्थ एव धर्मस्य कामस्य च आधारः। अर्थरहिते लोके धर्मस्य पालनं न शक्यते, लोककल्याणं च न सिध्यति। तथापि, अत्र अपि निर्दिष्टम् - "अर्थः धर्मस्य वशे भवेत्" - अर्थः धर्मस्य अधीनः भवितव्यः, अन्यथा सः समाजस्य विनाशाय कारणं भवति। युधिष्ठिरः अपि राजधर्मे एवमुक्तवान् यत् -**"मधुहृत् पुष्परेणेव"**[11] राज्ञा करग्रहणं तथा कर्तव्यं यथा मधुमक्खी पुष्पात् मधु गृह्णाति। करः एषः एव भवेत् यः प्रजायाः क्लेशं न जनयेत्, एवं च तैः संग्रहिताः आर्थिकसंसाधनाः पुनः जनकल्याणाय विनियोजनीयाः। एषा दृष्टिः आधुनिकस्य प्रगतिशीलकरव्यवस्थायाः, संसाधनपुनर्वितरणस्य, च सततविकासस्य तत्त्वैः सम्यग् मेलं गच्छति।

महाभारते शान्तिपर्वे, अनुशासनपर्वे च तथा अन्येषु अनेकेषु प्रसङ्गेषु पर्यावरणरक्षणस्य**,** प्राकृतिकसंसाधनानां संतुलितोपयोगस्य**,** सामाजिक-आर्थिकसंतुलनस्य च स्पष्टाः सिद्धान्ताः उपलभ्यन्ते। अत्र सततविकासस्य भावः एवं प्रतिपाद्यते**-** न प्रकृतेः अतीवशोषणं कर्तव्यम्, किन्तु तस्याः संतुलितं विनियोगः करणीयः।मनुष्यः, पशवः, पक्षिणः, वनस्पत्यः च - एतेषां सर्वेषां कृते समानरूपेण जीवने आवश्यकं साधनं सुनिश्चितं भवेत्। तथा भाविन्याः पीढ्यः कृते अपि संसाधनानां संरक्षणं अनिवार्यम्। धर्मः, अर्थः, कामः, मोक्षश्च - एतेषु धर्मः सर्वोपरि स्थाप्यः। भौतिकविकासः अपि धर्मनिष्ठया मर्यादायामेव स्थापनीयः। महाभारते इदं स्पष्टतया निर्दिष्टं यत् - "वनं, जलं, भूमिश्च रक्षितव्यानि; एते राष्ट्रस्य समृद्धेः आधाराः। **"**शान्तिपर्वे राज्ञः कृते आदेशः अस्ति - **"वनानि रक्षेत्, तोयानि च रक्षेत्।"**[12] अर्थात् राजा वनानां जलस्रोतानां च रक्षणं कर्तुम् अर्हति। एषः एव विचारः आधुनिकस्य **Sustainable Development Goal 15 (Life on Land)** तथा **Goal 6 (Clean Water and Sanitation)** इत्येताभ्यां लक्ष्यार्थैः सम्यक् मेलं गच्छति। महाभारते जैवविविधतायाः रक्षणाय अपि शिक्षाः दत्ताः। अनुशासनपर्वे उक्तं - **"सर्वभूतहिते रतः"**अर्थात् -यः सर्वेषां प्राणिनां हिते रतः भवति, सः एव धर्मनिष्ठः उच्यते। एषा शिक्षा आधुनिकस्य **Biodiversity Conservation** इत्यस्य तत्त्वं समर्थयति। भीष्मपितामहः युधिष्ठिरं प्रति उपदिशति यत् - कृषिक्षेत्रस्य अतिशयदोहनं न करणीयम्। भूमिः यथासमयं विश्रामं लभेत, येन सा दीर्घकालं फलप्रदा भवेत। अयं दृष्टिकोणः "सस्टेनेबल् एग्रीकल्चर" इत्यस्य

आधुनिकविचारस्य सुस्पष्टं प्रतिबिम्बं दर्शयति। महाभारते पर्यावरणदृष्टिः केवलं भौतिकसंसाधनरक्षणेन सीमितः नास्ति, अपि तु सः नैतिकता**,** धर्मः**,** प्रकृतेः सहजीवनभावः च इत्येषां स्थापनायाम् अपि केन्द्रितः अस्ति। एषः ग्रन्थः अस्मान् शिक्षयति यत् - विकासः तदैव स्थिरः भवति यदा सः प्रकृतेः सह न संघर्षं करोति, किन्तु सहयोगं साधयति।

| **क्र.सं.** | **SDG संख्या एवं लक्ष्य** | **सततविकासस्य आयामः** | **महाभारते प्रतिपादितः सिद्धान्तः** | **महाभारतीय उदाहरणम् / सन्दर्भः** | **समकालीनप्रासङ्गिकता** |
|---|---|---|---|---|---|
| 1 | **SDG 1: निर्धनतानिवारणम्** (No Poverty) | सामाजिक-आर्थिकः | दानम्, प्रजापालनम्, दुर्बलजनसंरक्षणम् | महाभारतम् राजधर्मप्रकरणे राज्ञः कर्तव्यं प्रजायाः योगक्षेमस्य सुनिश्चितीकरणम् | समावेशीविकासः, सामाजिकसुरक्षा |
| 2 | **SDG 2: क्षुधानिवारणम्** (Zero Hunger) | आर्थिक-पर्यावरणीयः | कृषिसंरक्षणम्, अन्नस्य महत्त्वम् | शान्तिपर्वे कृषेः, गोपालनस्य च महत्त्वम् | खाद्यसुरक्षा, सततकृषिः |
| 3 | **SDG 3: उत्तमस्वास्थ्यं कल्याणं च** (Good Health and Well-being) | सामाजिकः | संयमितजीवनम्, शारीरिक-मानसिकसन्तुलनम् | वनपर्वे तपः, योगः, नियमपालनम् | समग्रस्वास्थ्यदृष्टिः |
| 4 | **SDG 4: गुणवत्तापूर्णशिक्षा** (Quality Education) | सामाजिकः | गुरुकुलव्यवस्था, ज्ञानार्जनम् | द्रोणाचार्यस्य गुरुकुले पाण्डवानां शिक्षणम् | मूल्याधारितशिक्षा |
| 5 | **SDG 5: लैङ्गिकसमानता** (Gender Equality) | सामाजिकः | स्त्रीसम्मानः, स्त्रीमर्यादारक्षणम् | द्रौपदीप्रसङ्गे स्त्री-अधिकारविमर्शः; कुन्ती, गान्धारी, सावित्री च | नारीसशक्तीकरणम् |
| 6 | **SDG 6: शुद्धजलम् एवं स्वच्छता** (Clean Water and Sanitation) | पर्यावरणीयः | जलसंरक्षणम्, नदीपूजनम् | तीर्थयात्राप्रसङ्गेषु नदीनां पवित्रतायाः वर्णनम् | जलव्यवस्थापनम् |
| 7 | **SDG 7: सुलभस्वच्छऊर्जा** (Affordable and Clean Energy) | पर्यावरणीयः | प्रकृतिसन्तुलनम्, सीमितोपभोगः | पञ्चमहाभूतसमन्वितजीवनशैली | नवीकरणीयऊर्जायाः प्रेरणा |
| 8 | **SDG 8: सभ्यकार्यं आर्थिकवृद्धिः च** (Decent Work and Economic Growth) | आर्थिकः | धर्माधारितार्थोपार्जनम् | विदुरनीतौ न्यायपूर्णजीविकायाः प्रतिपादनम् | नैतिकव्यापारः |
| 9 | **SDG 9: उद्योगः नवाचारः आधारभूतसंरचना च** (Industry, Innovation and Infrastructure) | आर्थिकः | लोकहिताधारितनिर्माणम् | इन्द्रप्रस्थनगरस्य योजनाबद्धनिर्माणम् | सततनगरयोजना |
| 10 | **SDG 10: असमानतान्यूनता** (ReducedInequalitie) | सामाजिकः | सर्वभूतहितम्, न्यायः | विदुरस्य समतामूलका नीति | सामाजिकसमरसता |
| 11 | **SDG 11: सततनगराः समुदायाश्च** (Sustainable Cities | सामाजिक-पर्यावरणीयः | सुशासनम्, नगरव्यवस्थापनम् | इन्द्रप्रस्थस्य स्थापत्यकला, जनकल्याणनीतिः | स्मार्ट-सस्टेनेबल-नगरमॉडेल् |

| | | | | | |
|---|---|---|---|---|---|
| | and Communities) | | | | |
| 12 | **SDG 12: उत्तरदायीउपभोगः उत्पादनं च** (Responsible Consumption and Production) | आर्थिक-पर्यावरणीयः | संयमः, मितव्ययिता | युधिष्ठिरस्य धर्माधारितजीवनम् | संसाधनसंरक्षणम् |
| 13 | **SDG 13: जलवायुपरिवर्तननिवारणम्** (Climate Action) | पर्यावरणीयः | प्रकृतिसंरक्षणम् | वनपर्वे वनजीवनस्य महत्त्वम् | पारिस्थितिकसन्तुलनम् |
| 14 | **SDG 14: जलमध्यस्थितजीवनसंरक्षणम्** (Life Below Water) | पर्यावरणीयः | नदी-सरोवरसंरक्षणम् | गङ्गा, यमुना, सरस्वती इत्यादीनां पावनतावर्णनम् | जलपारिस्थितिकीय संरक्षणम् |
| 15 | **SDG 15: स्थलजीवनसंरक्षणम्** (Life on Land) | पर्यावरणीयः | वनसंरक्षणम्, जैवविविधितारक्षणम् | काम्यकवनम्, द्वैतवनम्, वनपर्व | वनसंरक्षणनीतिः |
| 16 | **SDG 16: शान्तिः न्यायः सुदृढसंस्थाः च** (Peace, Justice and Strong Institutions) | सामाजिक-राजनीतिकः | राजधर्मः, न्यायः, शान्तिस्थापनम् | श्रीकृष्णस्य शान्तिदूतत्वम्; भीष्मस्य राजधर्मोपदेशः | सुशासनम् |
| 17 | **SDG 17: लक्ष्यसाधनार्थं वैश्विकसाझेदारी** (Partnerships for the Goals) | सामाजिकः | सहयोगः, लोकसङ्ग्रहः | पाण्डवानां सहयोगात्मकनेतृत्वम् | बहुपक्षीयसहकार्यं |

**निष्कर्षः** अस्य समीक्षात्मकाध्ययनस्य आधारेण निष्कर्षतया वक्तुं शक्यते यत् महाभारतम् केवलम् ऐतिहासिकमहाकाव्यं नास्ति, अपितु मानवजीवनस्य समग्रविकासाय मार्गदर्शकग्रन्थरुपेण प्रतिष्ठितम् अस्ति। अस्मिन् प्रतिपादिताः धर्मः, न्यायः, अहिंसा, लोकसंग्रहः, सर्वभूतहितम्, संयमः, दानशीलता तथा उत्तरदायित्वबोधः इत्यादयः सिद्धान्ताः आधुनिकसततविकासस्य मूलतत्त्वैः सह सुसम्बद्धाः दृश्यन्ते। सामाजिकदृष्ट्या महाभारते समता, सामाजिकसौहार्दम्, कर्तव्यपरायणता तथा लोककल्याणस्य आदर्शाः प्रतिपादिताः सन्ति, ये सामाजिकस्थैर्यस्य तथा समावेशीविकासस्य आधारभूततत्त्वानि भवन्ति। आर्थिकदृष्ट्या धर्माधारितार्थोपार्जनम्, न्यायपूर्णवितरणव्यवस्था तथा प्रजाहितमुखी शासनव्यवस्था इत्यादयः विचाराः आर्थिकसन्तुलनस्य स्थायित्वस्य च पोषकाः सन्ति। पर्यावरणीयदृष्ट्या सर्वभूतानां प्रति करुणा, प्रकृतेः सम्मानः, संसाधनानां मितोपयोगः तथा मानव-प्रकृत्योः सामञ्जस्यपूर्णसम्बन्धस्य प्रतिपादनं पर्यावरणसंरक्षणस्य सततविकासस्य च महत्त्वपूर्णमाधारं प्रदर्शयति। महाभारते प्रतिपादितः धर्मः केवलं धार्मिकाचारस्य विषयः न, अपितु व्यक्तिगत-सामाजिक-आर्थिक-पर्यावरणीयउत्तरदायित्वानां समन्वितजीवन पद्धतिरुपेण अवगन्तव्यः। एषा धर्माधारितजीवनदृष्टिः वर्तमानकाले उद्भूतानां सामाजिकविषमतानां, आर्थिकअसन्तुलनस्य तथा पर्यावरणसङ्कटस्य समाधानाय प्रभावीमार्गदर्शनं प्रदातुं समर्था अस्ति।

अतः प्रतिपद्यते यत् महाभारते निहिताः शाश्वतजीवनमूल्याः तथा नैतिकसिद्धान्ताः आधुनिकसततविकासस्य वैचारिकाधाररुपेण ग्राह्याः सन्ति। एतेषां तत्त्वानां समुचितव्याख्या तथा व्यवहारिकप्रयोगः मानवसमाजस्य समग्रकल्याणाय, पर्यावरणसंरक्षणाय तथा भावीपीढीनां हिताय अत्यन्तमुपयोगी सिद्ध्येत्। महाभारतम् एवम् आधुनिकसततविकासचिन्तनस्य एकं महत्त्वपूर्णं भारतीयदर्शनाधिष्ठितं स्रोतस्वरुपं मन्यते।

**सन्दर्भ सूची:**


1. महाभारतम्, कर्णपर्व
2. ईशावास्य उपनिषद, मंत्र 1
3. महाभारत, आदिपर्व, 1/1/274
4. महाभारत, आदिपर्व, 1.58
5. महाभारतम्, स्वर्गारोहणपर्व
6. महाभारतीयधर्मदृष्टिः, शान्तिपर्वे
7. महाभारतम्, अनुशासनपर्व
8. अनुशासन पर्व, 46.5
9. महाभारत, शांतिपर्व 188.5
10. महाभारत, शान्तिपर्व, 69.14
11. महाभारत, शान्तिपर्व 88.4
12. शांति पर्व, 69


**सन्दर्भग्रन्थाः**


1. ईशावास्योपनिषद् – डॉ विजयशङ्करपाण्डेयः, मोतीलालबनारसीदासः, वाराणसी, 2011|
2. कठोपनिषद् – बलवानसिंहयादवः, चौखम्बा संस्कृत भवनम्, वाराणसी, 2012।
3. केनोपनिषद् – गोविन्दभवनकार्यालयः, गीताप्रस्स, गोरखपुरम्, 2012।
4. महाभारतम् (षष्ठखण्डः) – अनुशासनपर्व, अश्वमेधिकपर्व, आश्रमवासिकपर्व, मौसलपर्व, महाप्रस्थानिकपर्व, स्वर्गारोहणपर्व च, गीताप्रेस, गोरखपुरम्, चतुर्दशमसंस्करणम्, संवत् 2070।
5. महाभारतम् – गीताप्रेस, गोरखपुरम्, 1993।
6. महाभारतम् (चतुर्थखण्डः) – द्रौणपर्व, कर्णपर्व, शल्यपर्व, सौप्तिकपर्व, स्त्रीपर्व च, गीताप्रेस, गोरखपुरम्, चतुर्दशमसंस्करणम्, संवत् 2070।
7. महाभारतम् (तृतीयखण्डः) – उद्योगपर्व तथा भीष्मपर्व, गीताप्रेस, गोरखपुरम्, चतुर्दशमसंस्करणम्, संवत् 2070।
8. महाभारतम् (द्वितीयखण्डः) – वनपर्वं विराटपर्व च, गीताप्रेस, गोरखपुरम्, चतुर्दशमसंस्करणम्, संवत् 2070।
9. महाभारतम् (पञ्चमखण्डः) – शान्तिपर्व, गीताप्रेस, गोरखपुरम्, चतुर्दशमसंस्करणम्, संवत् 2070।
10. महाभारतम् (प्रथमखण्डः) – आदिपर्वं सभापर्व च, गीताप्रेस, गोरखपुरम्, चतुर्दशमसंस्करणम्, संवत् 2070।
11. महाभारतम् – हिन्दीभाषानुवादेन सहितं षड्खण्डात्मकम्, गीताप्रेस, गोरखपुरम्, चतुर्थसंस्करणम्, वि.सं. 2044।
12. महाभारतम् – साहित्याचार्यः पण्डितरामनारायणदत्तशास्त्रीपाण्डेयः, गीताप्रेस, गोरखपुरम्, संवत् 2070।
13. महाभारतम् – नीलकण्थकृतं भारतभवदीयटीकासहितम्, निरण्यसागरप्रेस्, मुम्बई, वि.सं. 1929।
14. महाभारतम् – नीलकण्थकृतं, भीष्मपर्वटीकासहितम्, चौखम्बा संस्कृत सीरीज़, वाराणसी, वि.सं. 1901।
15. महाभारतम् – सम्पादकः जयदयालगोयन्दकः, गीताप्रेस, गोरखपुरम्, वि.सं. 1936।
16. श्रीमद्भगवद्गीता – आद्याप्रसादमिश्रः, अक्षयवटप्रकाशनम्, इलाहाबाद्, 2006।
17. श्रीमद्भगवद्गीता – गीताप्रेस, गोरखपुरम्, संवत् 2069।


**अन्तर्जालस्त्रोताः –**


1. Shodhganga – https://shodhganga.inflibnet.ac.in


•